श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तत्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तत्रिंशः सर्गः ॥

## श्रीरामस्य सदस्यैः सह राजसभायामुपवेशनम्

अभिषिक्ते तु काकुत्स्थे धर्मेण विदितात्मनि।
व्यतीता या निशा पूर्वा पौराणां हर्षवर्धिनी ॥ **7.37.1** ॥

तस्यां रजन्यां व्युष्टायां प्रातर्नृपतिबोधकाः।
बन्दिनः समुपातिष्ठन् सौम्या नृपतिवेश्मनि ॥ **7.37.2** ॥

ते रक्तकण्ठिनः सर्वे किन्नरा इव शिक्षिताः।
तुष्टुवुर्नृपतिं वीरं यथावत् सम्प्रहर्षिणः ॥ **7.37.3** ॥

वीर सौम्य प्रबुध्यस्व कौसल्याप्रीतिवर्धन।
जगद्धि सर्वं स्वपिति त्वयि सुप्ते नराधिप ॥ **7.37.4** ॥

विक्रमस्ते यथा विष्णो रूपं चैवाश्विनोरिव।
बुद्ध्या बृहस्पतेस्तुल्यः प्रजापतिसमो ह्यसि ॥ **7.37.5** ॥

क्षमा ते पृथिवीतुल्या तेजसा भास्करोपमः।
वेगस्ते वायुना तुल्यो गाम्भीर्यमुदधेरिव ॥ **7.37.6** ॥

अप्रकम्प्यो यथा स्थाणुश्चन्द्रे सौम्यत्वमीदृशम्।
नेदृशाः पार्थिवाः पूर्वं भवितारो नराधिप ॥ **7.37.7** ॥

यथा त्वमसि दुर्धर्षो धर्मनित्यः प्रजाहितः।
न त्वां जहाति कीर्तिश्च लक्ष्मीश्च पुरुषर्षभ॥ **7.37.8**॥

श्रीश्च धर्मश्च काकुत्स्थ त्वयि नित्यं प्रतिष्ठितौ।
एताश्चान्याश्च मधुरा बन्दिभिः परिकीर्तिताः॥ **7.37.9**॥

सूताश्च संस्तवैर्दिव्यैर्बोधयन्ति स्म राघवम्।
स्तुतिभिः स्तूयमानाभिः प्रत्यबुध्यत राघवः॥ **7.37.10**॥

स तद्विहाय शयनं पाण्डराच्छादनास्ततम्।
उत्तस्थौ नागशयनाद्धरिर्नारायणो यथा॥ **7.37.11**॥

तमुत्थितं महात्मानं प्रह्वाः प्राञ्जलयो नराः।
सलिलं भाजनैः शुभैरुपतस्थुः सहस्रशः॥ **7.37.12**॥

कृतोदकः शुचिर्भूत्वा काले हुतहुताशनः।
देवागारं जगामाशु पुण्यमिक्ष्वाकुसेवितम्॥ **7.37.13**॥

तत्र देवान् पितॄन् विप्रानर्चयित्वा यथाविधि।
बाह्यकक्षान्तरं रामो निर्जगाम जनैर्वृतः॥ **7.37.14**॥

उपतस्थुर्महात्मानो मन्त्रिणः सपुरोहिताः।
वसिष्ठप्रमुखाः सर्वे दीप्यमाना इवाग्नयः॥ **7.37.15**॥

क्षत्रियाश्च महात्मानो नानाजनपदेश्वराः।
रामस्योपाविशन् पार्श्वे शक्रस्येव यथामराः॥ **7.37.16**॥

भरतो लक्ष्मणश्चात्र शत्रुघ्नश्च महायशाः।
उपासाञ्चक्रिरे हृष्टा वेदास्त्रय इवाध्वरम्॥ **7.37.17**॥

याताः प्राञ्जलयो भूत्वा किङ्करा मुदिताननाः।
मुदिता नाम पार्श्वस्था बहवः समुपाविशन्॥ **7.37.18** ॥

वानराश्च महावीर्या विंशतिः कामरूपिणः।
सुग्रीवप्रमुखा राममुपासन्ते महौजसः॥ **7.37.19** ॥

विभीषणश्च रक्षोभिश्चतुर्भिः परिवारितः।
उपासते महात्मानं धनेशमिव गुह्यकः॥ **7.37.20** ॥

तथा निगमवृद्धाश्च कुलीना ये च मानवाः।
शिरसा वन्द्य राजानमुपासन्ते विचक्षणाः॥ **7.37.21** ॥

तथा परिवृतो राजा श्रीमद्भिर्ऋषिभिर्वरैः।
राजभिश्च महावीर्यैर्वानरैश्च सराक्षसैः॥ **7.37.22** ॥

यथा देवेश्वरो नित्यमृषिभिः समुपास्यते।
अधिकस्तेन रूपेण सहस्राक्षाद् विरोचते॥ **7.37.23** ॥

तेषां समुपविष्टानां तास्ताः सुमधुराः कथाः।
कथ्यन्ते धर्मसंयुक्ताः पुराणज्ञैर्महात्मभिः॥ **7.37.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तत्रिंशः सर्गः॥